अनुक्रमाङ्क : ......................................

कूट सं. : 8-20-21S–A

कृपया जाँच कर लें कि इस प्रश्न–पत्र में कुल 20 प्रश्न हैं और कुल 12 मुद्रित पृष्ठ हैं।

# कक्षा–अष्टमी

# संस्कृतम्

## वार्षिकी परीक्षा (FEB.-MAR. 2021)

**निर्धारितावधिः – होरात्रयम्** **पूर्णाङ्काः – 80**

**निर्देशा :**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।
6. खण्डक्रमः अपि लेखनीयः।

**खण्डः–'क' (अपठित–अवबोधनम्)** **(10 अङ्काः)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत

भारते गङ्गा पवित्रतमा नदी मन्यते। जनाः एतां मातृरूपे पूजयन्ति। एषा हिमालयात् स्वजले औषधीयगुणान् धृत्वा अग्रे सरति। अतः अस्याः जलम् अमृततुल्यम् अस्ति। परन्तु एषा अधुना मलिना भवति। अस्याः जले जनाः अवकरं पुष्पपत्रादिकं च क्षिपन्ति। उद्योगानां मलिन–रसायनमिश्रितवस्तुभिः अपि गङ्गायाः पवित्रं जलं प्रदूषितं भवति। सर्वकारः अस्याः पवित्रतां रक्षितुं अनेकान् कार्यक्रमान् परिचालयति। स्थाने स्थाने मलिनजलपरिशोधनाय अनेके उपायाः क्रियन्ते। जनजागरणाय अपि अनेके कार्यक्रमाः प्रचलन्ति। अतः अधुना अस्य सुपरिणामः दृश्यते। एतैः कार्यैः गङ्गाजलं शुद्धं भवति। गङ्गायाः पवित्रता पुनः आगच्छति। सम्पूर्णे भारते जनाः गङ्गायाः स्वच्छतायै जागृताः भवन्ति परिशोधनाय च सङ्कल्पं कुर्वन्ति। परम् अधुना अपि बहुकार्यं करणीयम् अस्ति। यदि वयं सर्वे मिलित्वा अस्मिन् कार्ये संलग्नाः भविष्यामः तर्हि गङ्गाजलम् अवश्यं शुद्धं भविष्यति।

I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2

(क) भारते का पवित्रतमा नदी मन्यते?

(ख) गङ्गाया: जलम् कीदृशम् अस्ति?

(ग) गङ्गा स्वजले कान् धृत्वा अग्रे सरति?

II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) 2×2=4

(क) गङ्गाया: जले जना: किं क्षिपन्ति?

(ग) भारते जना: गङ्गाया: स्वच्छतायै किं कुर्वन्ति?

(ग) गङ्गाया: पवित्रं जलं कथं प्रदूषितं भवति?

III. गद्यांशाय समुचितं शीर्षकं लिखत। 1

IV. निर्देशानुसारम् विकल्पेभ्य: उचितम् उत्तरम् चित्वा लिखत– (केवलं प्रश्नत्रयम्) 1×3=3

(क) 'गङ्गाया: पवित्रता पुन: आगच्छति।।' अस्मिन् वाक्ये 'पवित्रता' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

(i) पुन: (ii) गङ्गाया: (iii) आगच्छति

(ख) 'एतै: कार्यै: गङ्गाजलं शुद्धं भवति।' अस्मिन् वाक्ये 'गङ्गाजलम् इति पदस्य विशेषणपदं किम् अस्ति?

(i) शुद्धम् (ii) एतै: (iii) भवति

(ग) गद्यांशे 'पूजयन्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(i) जना: (ii) नदी (iii) एषा

(घ) गद्यांशे 'विषतुल्यम्' इति पदस्य विलोमपदं किम् अस्ति?

(i) मलिना (ii) अमृततुल्यम् (iii) जलम्

**खण्डः-'ख' (रचनात्मक-कार्यम्)** **(15 अङ्काः)**

2. भवान् गौरवः। स्वमित्रं विशेषं प्रति लिखितं पत्रं मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पूर्णं पत्रं लिखत– ½×10=5

आदर्शनगरम्

जयपुरतः

दिनाङ्कः .......................

प्रिय मित्र विशेष!

(1) ..........................।

अत्र कुशलं तत्रास्तु। भवतः पत्रं (2) ..........................। पत्रं पठित्वा अहम् अतीव प्रसन्नः अभवं यत् भवान् स्वदेशीय-वस्तूनां प्रयोगविषये एकस्यां कार्यशालायां भागं गृहीतवान्। तत्र भवान् निर्णयं कृतवान् यत् भवान् अधुना (3) .......................... अधिकं प्रयोगं करिष्यति। अहम् अपि निश्चयं करोमि यत् अहम् अपि एवम् एव (4) ..........................। मित्र! एतत् सत्यम् अस्ति यत् यदि अस्माकं देशे (5) ... ....................... जनाः स्वदेशीयवस्तूनाम् अधिकं प्रयोगं करिष्यन्ति तदा अस्माकं (6) ....................... अन्यदेशान् प्रति न (7) ..........................। अतः वयं सर्वे वैदेशिकवस्तूनां प्रयोगं विहाय स्वदेशे निर्मितानां वस्तूनाम् (8) .......................... कुर्याम्। अनेन अस्माकं देशः आर्थिक-क्षेत्रे अपि समर्थः भविष्यति। (9) .......................... मम प्रणामान् निवेदयतु।

भवतः मित्रम्

(10) ..........................

मञ्जूषा

| |
|---|
| प्राप्तम्, नमो नमः, पितृभ्यां, गौरवः, उपयोगं, गमिष्यति, धनं, सर्वे, करिष्यामि, स्वदेशीयवस्तूनाम् |

3. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– 1×5=5



मञ्जूषा

| |
|---|
| जलाशयः , पुष्पाणि , हंसौ , विकसन्ति , तरतः , खगाः , जले , मत्स्याः , दृश्यं , सुन्दरम् , उत्पतन्ति |

***अथवा***

'उद्यानम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत–

मञ्जूषा

| |
|---|
| वृक्षाः , जनाः , भ्रमन्ति , विकसन्ति , पुष्पाणि , खगाः , बालाः , क्रीडन्ति , उत्पतन्ति |

4. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत– (केवलं पञ्चवाक्यानि) 1×5=5

(क) वे सब वहाँ खेल रहे थे।

They all are playing there.

(ख) हम सब संस्कृत पढ़ेंगे।

We will read Sanskrit.

(ग) वह विद्यालय जाएगा।

He will go to school.

(घ) तुम दोनों सदा सत्य बोलते हो।

Both of you always speak the truth.

(ङ) मैंने चित्र देखा।

I saw the picture.

(च) तुम सबने आज क्या पढ़ा?

What did you all read today ?

**खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्)** **(25 अङ्काः)**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत– (केवलं प्रश्नत्रयम्)

(क) छात्राः <u>विद्यालयं</u> गच्छन्ति। 1×3=3

(ख) महर्षिः <u>दया + आनन्दः</u> अतीव क्षमाशीलः आसीत्।

(ग) यदा परिश्रमं करिष्यसि <u>तदा + एव</u> सफलतां प्राप्स्यसि।

(घ) <u>परमेश्वरः</u> अस्माकं रक्षकः अस्ति।

6. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत– (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) ...................... पितृभक्तिः अपूर्वा आसीत्।

(i) रामम् (ii) रामस्य (iii) रामः

(ख) एतानि ........................ मधुराणि सन्ति।

(i) फलानि (ii) फलस्य (iii) फले

(ग) जना: ............................ उपदेशं श्रुत्वा प्रसन्ना: भवन्ति।

(i) साधु: (ii) साधवे (iii) साधो:

(घ) ............................ जलं शीतलम् अस्ति।

(i) नदीम् (ii) नद्या: (iii) नद्यै

(ङ) ............................ सैनिक: भूत्वा देशरक्षां करिष्यामि।

(i) अहम् (ii) वयम् (iii) अस्माभि:

7. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रदत्तविकल्पेभ्य: प्रयुज्य पूर्णं वाक्यं लिखत– (केवलं प्रश्नत्रयम्) 1×3=3

(क) सभायां ............................ जना: सन्ति। (85)

(i) पञ्चाशीति: (ii) पञ्चसप्तति: (iii) पञ्चनवति:

(ख) वने ............................ हरिणा: चरन्ति। (67)

(i) षट्षष्टि: (ii) षट्सप्तति: (iii) सप्तषष्टि:

(ग) लतायां ............................ पुष्पाणि विकसन्ति। (4)

(i) चत्वार: (ii) चत्वारि (iii) चतस्र:

(घ) उद्याने ............................ बाला: भ्रमन्ति। (29)

(i) नवविंशति: (ii) नवदश (iii) नवत्रिंशत्

8. अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं कारणं च लिखत–(केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) गृहं परित: उद्यानम् अस्ति।

(ख) छात्रा: विद्यालयात् बहि: गच्छन्ति।

(ग) अलं विवादेन ।

(घ) उद्यानस्य पुरत: जलाशय: अस्ति।

(ङ) शिष्येभ्य: स्वस्ति।

9. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत– (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) अहं प्रतिदिनं यथासमयं विद्यालयं ............................।

(i) गच्छति (ii) गच्छामि (iii) गच्छन्ति

(ख) यूयं चित्राणि ............................।

(i) पश्यतु (ii) पश्य (iii) पश्यत

(ग) ते छात्राः सुलेखम् ............................।

(i) अलिखत् (ii) अलिखताम् (iii) अलिखन्

(घ) वयम् अधुना गणितं ...........................।

(i) पठिष्यामि (ii) पठिष्यावः (iii) पठिष्यामः

(ङ) सः श्रमिकः कार्यं कृत्वा धनं ...........................।

(i) लभते (ii) लभसे (iii) लभन्ते

10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत– (केवलं प्रश्नत्रयम्) 1×3=3

(क) बालाः खेलित्वा गृहम् आगच्छन्ति।

(ख) छात्राः पठ् + तुमुन् विद्यालयं गच्छन्ति।

(ग) आलस्यं परि + त्यज् + ल्यप् परिश्रमः कर्तव्यः।

(घ) सः खादित्वा भ्रमणं करोति।

11. मञ्जूषायाः प्रदत्तैः उचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा पूर्णवाक्यानि लिखत–(केवलं प्रश्नचतुष्टयम्)

(क) कोरोना-काले गृहात् बहिः ............................ गच्छ। ½×4=2

(ख) परिश्रमेण .......................... सफलता प्राप्यते।

(ग) वने पशवः .......................... भ्रमन्ति।

(घ) तव गृहं .......................... अस्ति ?

(ङ) .......................... मेघाः अगर्जन्।

मञ्जूषा – | कुत्र , एव , मा , सहसा , इतस्ततः |

12. अधोलिखितेषु वाक्येषु रेखाङ्क्तिपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत–(केवलं प्रश्नचतुष्टयम्)

(क) आकाशे खगाः उत्पतन्ति। ½×4=2

(ख) जनः आपणात् फलानि आ + नयति।

(ग) रुग्णः औषधम् खादित्वा सुखम् अनुभवति।

(घ) सत्यम् अवश्यं वि + जयते।

(ङ) प्रकाण्डात् शाखाः सम्भवन्ति।

**खण्डः-'घ' (पठित-अवबोधनम्)** **(30 अङ्काः)**

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

एकदा एकस्मिन् वने एकः शृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषकसमूहस्य राजा हृष्टः पुष्टः आसीत्। शृगालः मूषकसमूहम् अनुसरति। तान् मूषकान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति। सः शृगालः किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहिः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। अन्यस्मिन् दिवसे प्रातः मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति। मूषकराजः तं पृच्छति–''भवान् एवं किमर्थं स्थितः अस्ति?'' शृगालः अवदत्–''यदि अहं चतुरः पादान् धरायां स्थापयिष्यामि तदा पृथ्वी अधः गमिष्यति।''

I. एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) ½×2=1

(क) कः मूषकसमूहम् अनुसरति?

(ख) वने शृगालः किं प्राप्तुम् इतस्ततः भ्रमति स्म?

(ग) प्रातः के शृगालं दृष्ट्वा चकिताः भवन्ति?

II. पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) मूषकराजः शृगालं किं पृच्छति?

(ख) शृगालः मूषकाणां बिलात् बहिः कथं तिष्ठति?

(ग) शृगालः मूषकाणां बिलस्य समीपं किमर्थं गच्छति?

III. निर्देशानुसारम् उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) गद्यांशे 'वने' इति पदस्य विशेषणपदं किम् अस्ति?

(ख) गद्यांशे 'अनुसरति' इति क्रियापदस्य कर्ता कः अस्ति ?

(ग) 'नीचैः' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

I. एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) ½×2=1

(क) सत्सङ्गतिः वाचि किं सिञ्चति?

(ख) का पापम् अपाकरोति?

(ग) सत्सङ्गतिः कस्याः जाड्यं हरति?

II. पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) सत्सङ्गतिः किं प्रसादयति?

(ख) मानोन्नतिं का दिशति?

(ग) सत्सङ्गतिः कां तनोति?

III. निर्देशानुसारम् उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) 'प्रसन्नं करोति' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(ख) 'सत्सङ्गतिः कथय किं न करोति पुंसाम्' अत्र अव्ययपदं किम् अस्ति?

(ग) 'करोति' इति क्रियायाः कर्तृपदं श्लोके किम् अस्ति?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

सुमेधा – संस्कृतभाषायाः कति रूपाणि सन्ति?

प्रबुद्धः – संस्कृतभाषायाः द्वे रुपे स्तः। एकं वैदिकं संस्कृतं द्वितीयं च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसाहित्यस्य किं प्रमुखं साहित्यम् अस्ति?

निष्ठा – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते।

सुमेधा – लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

विवेकः – वाल्मीकेः कालात् लौकिकसंस्कृतस्य प्रारम्भः मन्यते। अस्य कृतिः 'रामायणम्' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति।

प्रणवः – लौकिकसंस्कृतस्य अन्ये प्रमुखाः ग्रन्थाः के? के च तेषां प्रणेतारः?

प्रज्ञा – महाभारतं व्यासेन विरचितम्।

रमेशः – रघुवंशं कुमारसंभवं च कालिदासेन रचिते महाकाव्ये स्तः।

शुभ्रा – कालिदासेन एव रचितानि अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् विक्रमोर्वशीयं च एतानि त्रीणि नाटकानि।

I. एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्) ½×2=1

(क) कस्याः द्वे रूपे स्तः?

(ख) व्यासेन किं विरचितम्?

(ग) लौकिकसंस्कृतस्य आदिमः ग्रन्थः कः?

II. पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) कालिदासेन कानि त्रीणि नाटकानि रचितानि?

(ख) लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

(ग) वैदिकसाहित्यस्य प्रमुखं साहित्यम् किम् अस्ति?

III. निर्देशानुसारम् उत्तरत–(केवलं प्रश्नद्वयम्) 1×2=2

(क) 'प्रमुखाः' इति विशेषणपदस्य विशेष्यपदं गद्यांशे किम् अस्ति?

(ख) 'समाप्तः' इति पदस्य विलोमपदं गद्यांशे किम् अस्ति?

(ग) 'संस्कृतभाषायाः कति रूपाणि सन्ति?' अस्मिन् वाक्ये रूपाणि इति पदस्य क्रियापदं किम् अस्ति?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत– ½×4=2

(क) बुद्धिर्यस्य बलं तस्य।

भावार्थः – बुद्धिः एव मनुष्यस्य वास्तविकं ..................... अस्ति। बुद्ध्या एव मनुष्यः शक्तिं प्राप्नोति। अतः यः ....................... अस्ति सः एव वस्तुतः शक्तियुक्तः अस्ति।

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

भावार्थः – अस्माकं शत्रुः अस्माकं ......................... एव अस्ति। एषः शत्रुः कः? आलस्यम्। आलस्यम् एव वस्तुतः अस्माकं ........................ अस्ति। अतः आलस्यं मा कुरु।

मञ्जूषा

| |
|---|
| शत्रुः , बलम् , शरीरे , बुद्धिमान् |

17. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत–
(केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) चटका <u>तृणैः</u> स्वगृहं निर्मितवती।

(ख) नदी भोजनेन अपि <u>जनान्</u> पालयति।

(ग) महर्षिः काशीनगरे <u>गङ्गायाः</u> तटे एकस्मिन् कुटीरे अतिष्ठत्।

(घ) क्षुधासमं <u>शरीरपीडनं</u> न अस्ति।

(ङ) महात्मा <u>रात्रौ</u> बुभुक्षितः अतिष्ठत्।

18. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत– ½×4=2

क्षुधासमं नास्ति शरीरपीडनं चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणं क्षमासमं नास्ति शरीररक्षणम्।।

अन्वयः क्षुधासमं ......................... न अस्ति, .......................... शरीरशोषणं न अस्ति, ........................ शरीरभूषणं न अस्ति, क्षमासमं .......................... न अस्ति।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखन्तु– ½×6=3

(क) महात्मा अवदत्–''क्रोधेन कार्याणि न सिध्यन्ति।''

(ख) महात्मा भोजनं विना एव कुटीरं प्रत्यागच्छत्।

(ग) सः नागरिकः महात्मनः चरणयोः अपतत्।

(घ) महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरे वसति स्म।

(ङ) नागरिकः कपाटम् आवृत्य कुत्रचित् गतः आसीत्।

(च) एकः नागरिकः महात्मानं रात्रिभोजाय प्रार्थयत्।

20. अधोलिखितानां पदानां शुद्धम् अर्थं मञ्जूषातः चित्वा समक्षं लिखत–(केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) वसुन्धरायाः

(ख) तटे

(ग) लोचनम्

(घ) विद्या

(ङ) वारिवाहाः

मञ्जूषा

| |
|---|
| ज्ञानम् , भूमेः , नेत्रम् , मेघाः , तीरे |

❑❑❑